क्रं. नं. २८

स्तोत्र संस्कृत

त्र्यंकटेशस्तोत्र

६१८/स्तो. ७ १८८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

श्रीगणेशायनमः॥ व्यंकटेशो वासुदेवः प्रद्युम्नोमितविक्रमः॥ संकर्षणोऽ
(1) निरुद्धश्च शेषाद्रिपतिरेव च॥१॥ जनार्दनः पद्मनाभो व्यंकटाचलवास
नः॥ सृष्टिकर्ताजगन्नाथो माधवो भक्तवत्सलः॥२॥ गोविंदो गोपतिः
कृष्णः केशवो गरुडध्वजः॥ वराहो वामनश्चैव नारायण अधोक्षजः॥३॥ श्रीध
रः पुंडरीकाक्षः सर्वदेवस्तुतो हरिः॥ श्रीनृसिंहो महासिंहः सूत्राकारः पुरातनः
॥४॥ रमानाथो महीभर्ता भूधरः पुरुषोत्तमः॥ चोलपुत्रप्रियः शांतो
ब्रह्मादीनां वरप्रदः॥५॥ श्रीनिधिः सर्वभूतानां भयकृद्भयनाशनः॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

व्यं० श्रीरामो रामभद्रश्च भवबंधैकमोचनः ॥६॥ भूतावासो गिरीवासः स्तोत्र
॥१॥ श्रीनिवासः श्रियःपतिः ॥ अच्युतानंत गोविंदो विष्णुर्वैकुंठनायकः
॥७॥ सर्वज्ञो कत्वारणं सर्वदैवतं ॥ समस्तदेवकवचं सर्वदे
(2) वशिखामणिः ॥८॥ इतीदं कीर्तितं यस्य विष्णोरमिततेजसः ॥
त्रिकालं यः पठेन्नित्यं पापं तस्य न विद्यते ॥९॥ राजद्वारे पथे घोरे
संग्रामे रिपुसंकटे ॥ भूतसर्पपिशाचादिभयं नास्ति कदाचन ॥१०॥ ॥१॥

(2A)

अपुत्रो लभते पुत्रं निर्धनो धनवान् भवेत् ॥ रोगार्तो मुच्यते रोगा
द्बद्धो मुच्येत बंधनात् ॥ ११ ॥ यद्यदिष्टतमं स्तोत्रे तत्तदाप्नोत्यसं
शयं ॥ ऐश्वर्यराज्यसन्मानं भुक्तिमुक्तिफलप्रदं ॥ १२ ॥ विष्णुलोकै
कसोपानं सर्वदुःखविनाशनं ॥ सर्वैश्वर्यप्रदं नृणां सर्वमंगल
कारकं ॥ १३ ॥ मायावी परमानंदं त्यक्त्वा वैकुंठमुत्तमं ॥ स्वामि
पुष्करणीतीरे रमया सह मोदते ॥ १४ ॥ कल्याणाद्भुतगात्रा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

यत्काभिलार्थप्रदायिने ॥ श्रीमद्वेंकटनाथाय श्रीनिवासाय ते नमः
॥२॥ ॥१५॥ व्यंकटाद्रिसमं स्थानं ब्रह्मांडे नास्ति किंचन ॥ व्यंकटेश समो
देवो न भूतो न भविष्यति ॥१६॥ स्वामिपुष्करणीस्नानं श्रीनिवास
स्य दर्शनं ॥ महाप्रसादस्वीकारं त्रैलोक्येपि दुर्लभं ॥१७॥ इति श्री
वराहपुराणे व्यंकटगिरिमाहात्म्ये व्यंकटेशस्तोत्रं संपूर्णं ॥ ॥ छ ॥ ॥



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com